दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णदशमी
कार्तिक 19 प्रविष्टाशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-6 ■ अङ्क-10 | 1 | नवम्बर 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 अंशविपणिसमाचारः भारतीयांववविपण्याम् अभूतपूर्वा वृद्धिः(सेन्सेक्सः ७६,९१७ अङ्केषु, निफ्टी २३,८१० अङ्केषु च संवृतः)

4 मुख्यमन्त्रियुवा- उद्यमी-विकास-अभियानस्य प्रगतिसमीक्षार्थं उपवेशनम् विकासभवने बैंकाधिकारिभिः लम्बित-प्रार्थनापत्राणां शीघ्रनिस्तारणस्य निर्देशः

10 दीपावल्याः धार्मिकं ज्योतिषीयं च महत्त्वं प्रतिपादितम्—आचार्यः विशालपाण्डेयः

प्रधानमन्त्रिणा नरेन्द्रमोदिना अष्टशतोत्तरैकविंशति-कोटिरूप्यकाणां पुणे-मेट्रो-परियोजनानां शिलान्यासः कृतः



प्रधानमन्त्रिणा नरेन्द्रमोदिना वीडियो-कान्फ्रेन्सिङ्ग-माध्यमेन प्रायः अष्टशतोत्तरैकविंशतिसहस्र-कोटिरूप्यकाणां पुणे-मेट्रो-परियोजनानां उद्घाटनम्, शिलान्यासश्च कृतः। महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्रफड्नविस् अपि अस्मिन् कार्यक्रमे भागम् अगृह्णात्। अस्मिन् अवसरे प्रधानमन्त्रिणा उक्तं यत् पुणे-नगरं विकसितभारतस्य सङ्कल्पं निर्माय महत्त्वपूर्णां भूमिकां निर्वहति तथा च मेट्रो-जालस्य विस्तारः नगरस्य विकासस्य गतिं वर्धयतीति । जनसमूहं सम्बोधनात् प्राक् प्रधानमन्त्रिणा जनाः दीपावल्यै शुभाशिताः। अद्यारभ्य यात्रिकाणां कृते एषा मेट्रोसेवा उद्घाटिता भविष्यति। सः पुणे-मेट्रो इत्यस्य द्वितीय-चरणस्य चतुर्णां नूतनानां मार्गाणां शिलान्यासम् अपि अकरोत् । देशे मेट्रो-मूलसौकर्याणां विकासविषयं प्रकाशयन् श्रीमोदी अवदत् यत् भारतस्य मेट्रो-जालस्य विगतकतिय-वर्षेषु महत् परिवर्तनं अभवत् ।

स्वास्थ्यसेवायाः आपूर्तिशृङ्खलां सुव्यवस्थितं कर्तुं औषधानां, चिकित्सोपकरणानां, सौन्दर्यप्रसाधनानां च कृते अधिकृतानां आयातकेन्द्राणां विस्तारस्य केन्द्रस्य प्रस्तावः अस्ति



केन्द्रीय-स्वास्थ्य-परिवारकल्याण-मन्त्रालयेन देशे औषधानां, चिकित्सोपकरणानां, सौन्दर्यप्रसाधनानाञ्च आयाताय अधिकृत प्रवेशस्थानानां जालस्य विस्तारार्थं औषधि-नियम-पञ्चत्वारिंशदधिकैकोन-विंशतीत्यस्य नियम-त्रिचत्वारिंशत् इत्यस्य संशोधनस्य प्रस्तावः कृतोऽस्ति। प्रस्तावित-संशोधनस्योद्देश्यं आयातकार्याणि सुगमं कर्तुं, वस्तुक्षमताञ्च वर्धयितुं, स्वास्थ्यसेवोत्पादानां आपूर्तिशृङ्खलां सुदृढं कर्तुं च अस्ति।

अस्य वर्षस्य प्रथम-षण्मासेषु भारतस्य निर्यातः चतुर्दश-प्रतिशतं यावत् वर्धितः - पीयूष गोयलः



वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः अवदत् यत् अस्य वर्षस्य प्रथम षण्मासेषु भारतस्य निर्यातः चतुर्दश-प्रतिशतं यावत् वर्धितः, अशीत्यधिक-चतुश्शत-बिलियन्-डालर्-परिमितम् अभवत्। सः अवदत् यत् गतवर्षे त्रिषष्ट्यधिक अष्टशत-बिलियन्-डालर्-परिमाण-निर्यातस्य विक्रमाङ्कं प्राप्य देशे वर्तमानवर्षे एक-लक्षकोटि-डालर्-परिमाणस्य लक्ष्यं निर्धारितम् अस्ति। नवदेहल्याः किरोड़ीमल-महाविद्यालये यङ्ग-लीडर्स-डिस्कोर्स-फ़ोरम् इत्यस्मिन् छात्रान् सम्बोधयन् श्रीगोयलः अवदत् यत् भारतस्य कौशलं, प्रतिभा, लोकतन्त्रं, विशाल-युव-जनसंख्याः च मिलित्वा देशस्य विकासम् अग्रे प्रसारयिष्यन्ति ।

उज्बेकिस्तानदेशे चिकित्सा शिक्षां प्राप्तुकामानां भारतीयच्छात्राणां कृते समर्थनम् अनुवर्तयेत् इति विदेशमन्त्रालयः आश्वासितवान्; अभ्यर्थिनः आधिकारिकोयानाम् अनुसरणं कुर्युरिति च प्रावोचत्

विदेशमन्त्रालयः अवदत् यत् चिकित्सा अध्ययनार्थं उज्बेकिस्तानं प्रति गच्छतां भारतीयच्छात्राणां शोषणं न भवेदिति सुनिश्चेतुं सर्वकारः प्रतिबद्धः अस्ति। नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् मध्य-एशियादेशे शिक्षां प्राप्तुकामनां भारतीयच्छात्राणां विषये भारतस्य उज्बेकिस्तानदेशेन सह निरन्तरं संवादं प्रचलति। विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत् ताशकन्द-नगरे भारतीय-दूतावासेन भारतीयच्छात्राणां हिताय सञ्चेतना प्रसारिता अस्ति। श्रीजायसवालेन छात्राः प्रोक्ताः यत् विदेशेषु उच्चशिक्षां प्रापणस्य निर्णयात् प्राक् नियमान् सावधानतया पठन्तु ।

सुभाषितम्

यथा चित्तं तथा वाचो,यथा वाचस्तथा क्रियाः।
चित्ते वाचि क्रियायां च,साधुनामेकरूपता॥

भावार्थः- जो चित्त (मन) में हो वही वाणी से प्रकट होना चाहिए और जो वाणी से प्रकट हो उसके अनुरूप ही कार्य करना चाहिए। जिनके चित्त, वाणी और कर्म में एकरूपता होती है वही साधुजन होते हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



अमेरिका-देशः ईरान्-देशस्य होर्मुज्-जलसंध्यां स्थितस्य केशम-द्वीपे आक्रमणं कृतवान्

अमेरिका-देशः ईरान्-देशस्य होर्मुज्-जलसंध्यां स्थितस्य केशम-द्वीपे आक्रमणं कृतवान् इति सूच्यते। प्राप्त-सूचनानुसारं यू. एस्. अधिकारिणः अवदन् यत् आक्रमणानि स्वभावतः सीमितानि आसन्, प्रमुख-युद्धाभियानानां पुनः आरम्भस्य सङ्केतः नास्तीति, तथा च यू. एस्. सम्पत्तिं विरुध्य इरानस्य भूस्तरात् वायु पर्यन्तं प्रक्षेपास्त्र विभीषिकां लक्ष्यीकृत्य रक्षात्मक-उपायाः आसन् । इरानस्य विदेशमन्त्रिणा अब्बास-अराघ्ची इत्यनेन इरानस्य प्रसारमाध्यमेषु उक्तं यत् मध्यस्थैः परामर्शः प्रचलति, अमेरिकादेशस्य उपराष्ट्रपतिः जे. डी. वेन्स् इत्येषः अवदत् यत् वाशिङ्ग्टन्-नगरम् वार्तासु प्रगतिम् अकरोत्। इरान्-देशः यथाशीघ्र सन्धिं इच्छति इति उक्त्वा राष्ट्रपतिः डोनाल्ड ट्रम्पः अपि सूचितवान्।

'मुरासु' तीव्रचक्रवात-प्रभञ्जनः दुर्बलः अभवत्; आन्ध्रप्रदेशस्य दक्षिणतटे सर्वत्र प्रचण्डवृष्टिः भवितुम् अर्हतीति सञ्चेतनास्ति



भारत-ऋतु-विज्ञान-विभागः अवदत् यत् आन्ध्रप्रदेशस्य तटीये 'मुरासु' इति तीव्र-चक्रवात-प्रभञ्जनः उत्तर-वायव्यदिशं प्रति अग्रे गच्छता क्रमेण चक्रवात प्रभञ्जनरूपेण दुर्बलं भविष्यति । आन्ध्रप्रदेशे तेलङ्गाना-राज्ये च अत्यधिकवृष्ट्या सह रक्तवर्णस्य पूर्वसूचना दत्तास्ति। दक्षिण-आन्ध्रप्रदेशस्य तटे, ओङ्गोल्-नगरस्य समीपे, नेल्लोर्-नरसपुर्-नगरयोः मध्ये अयं प्रभञ्जनः तटं प्राप्नोत् । प्रभावितमण्डलेषु साहाय्यस्य पुनर्निर्माणस्य च कार्याणि निरन्तरं प्रचलन्ति । राज्यसर्वकारानुसारं, दशशताधिकाः जनाः सहाय्य शिबिरेषु स्थानान्तरिताः सन्ति। अत्रान्तरे, केन्द्रीय-गृहमन्त्री अमितशाहः मुख्यमन्त्रिणा सह वार्तालापं कृत्वा चक्रवातीय-प्रभावस्य, उपशमनोपायानां विषये अपृच्छत्। अत्रान्तरे दक्षिण-ओडिशा-प्रदेशेऽपि चक्रवातस्य प्रभावः अस्ति, तस्य केषुचित् भागेषु वृष्टेः सूचना अस्ति। राष्ट्रिय-आपद्-प्रतिक्रिया-बलम् एन्. डी. आर्. एफ्. इति मुरासु-चक्रवातस्य परिप्रेक्ष्ये उद्धारकार्यार्थं साहाय्यकार्यार्थं च पञ्चराज्येषु अष्टत्रिंशत् दलानि न्ययोजयत्।

दोहा-नगरे आई. एस्. एस्. एफ्. विश्व चैम्पियन्शिप् इति क्रीडायां पुरुषाणां पञ्चाशत् मीटर् पिस्तोलाख्य भुशुण्डि-दलस्पर्धायां भारतं स्वर्णपदकं प्राप्नोत्



रविन्दर सिङ्घः, सौरभ चौधरी, अमनप्रीत्सिङ्घः चेति भारतीय क्रीडकाः दोहा-नगरे प्रचलिते आई. एस्. एस्. एफ्. विश्व चैम्पियन्शिप्-क्रीडायां पुरुषदलं पञ्चाशत्-मीटर् पिस्तोलाख्य भुशुण्डि-स्पर्धायां स्वर्णपदकं प्राप्तवान्। सम्प्रति भारतं स्वर्ण-रजत-पदकाभ्यां सह तालिकायां शीर्षस्थाने अस्ति।

नगरीयनिकायानां निवृत्तवेतनभाजां पञ्चदशसु दिनेषु निर्धारिता भविष्यति संशोधिता निवृत्तिवेतनराशिः, विभागनिदेशकेन दत्ताः आदेशाः



हिमसंस्कृतवार्ताःशिमला। हिमाचलप्रदेशस्य षट्सप्ततेः (७६) नगरीयनिकायानां प्रायः २३०० निवृत्तवेतनभाजां (पेंशनराणां) संशोधिता निवृत्तिवेतनराशिः (संशोधितपेंशन) अधुना पञ्चदशसु (१५) दिनेषु निर्धारिता भविष्यति। नगरीयविकासविभागस्य सचिवेन अमरजीतसिंहेन मङ्गलवासरे त्वरितनिस्तारणार्थं निदेशकाय कठोराः आदेशाः निर्गताः। हिमाचलप्रदेश- निवृत्तवेतनभाक् - संयुक्तसङ्घर्षसमित्याः प्रतिनिधिमण्डलेन सचिवालये सचिवेन अमरजीतसिंहेन सह मेलनं कृतम्। समितेः अतिरिक्त-महासचिवस्य भूपरामवर्मणः नेतृत्वे पञ्चदशसदस्यीयेन दलेन ज्ञापनं समर्पितम्। अस्याः उपवेशनगोष्ठ्याः अन्तराले नगरीयविकासविभागस्य निदेशकः डॉ. नीरजकुमारः अपि उपस्थितः आसीत्। वर्मामहोदयः विज्ञापितवान् यत् २०२६ तमस्य वर्षस्य जूनमासस्य मन्त्रिमण्डल-उपवेशने संशोधितानां वेतनमानानाम् आधारेण निवृत्तिवेतनस्य स्वीकृतिः लब्धा आसीत्। अस्यान्तर्गततया कर्मचारिभ्यः १ जनवरी २०१६ दिनाङ्कात् आर्थिकलाभस्य वितरणं सुनिश्चितम् अभवत्। अस्य समग्रस्य व्ययस्य वहनं सम्बद्धैः निकायैः स्वकीयानां संसाधनानां माध्यमेन एव करणीयं भविष्यति। राज्ये अद्यावधि निवृत्तवेतनभोगिभ्यः १ जनवरी २००६ दिनाङ्कस्य वेतनमानस्य आधारेण निवृत्तिवेतनं प्राप्यमाणम् आसीत्। वर्तमाने हिमाचलप्रदेशे अष्ट (८) नगरनिगमाः, नवविंशतिः (२९) नगरपरिषद्- संस्थाः, नवत्रिंशत् (३९) नगरपञ्चायताश्च सञ्चालिताः सन्ति। निदेशकेन विज्ञापितं यत् कर्मचारिणां न्यूनतायाः कारणात् चतुर्षु मासेषु केवलम् अशीतिः (८०) प्रकरणानाम् एव स्वीकृतिः अभवत्। अधुना तेन अधीनस्थ-अधिकारिभ्यः अवशिष्टानि सर्वाणि प्रकरणाणि पञ्चदशसु दिनेषु निस्तारयितुं निर्देशाः दत्ताः। आगामिनि वर्षे षोडश-वित्त-आयोगस्य प्रवृत्तौ सत्यां निर्धारितनियमानाम् अन्तर्गततया प्रक्रिया सम्पूर्णा विधास्यते।



अंशविपणिसमाचारः भारतीयांववविपण्याम् अभूतपूर्वा वृद्धिः (सेन्सेक्सः ७६,९१७ अङ्केषु, निफ्टी २३,८१० अङ्केषु च संवृतः)

मुम्बई,३ नवम्बर २०२६,
हिमसंस्कृतवार्ताः- डॉ विमलेश झा

भारतीयांशविपण्याम् अद्य मङ्गलवासरेऽपि उत्साहवर्धकं वातावरणं दृष्टम्। प्रमुखसूचकाङ्कयोः सेन्सेक्स-निफ्टीत्येतयोः चतुर्थे क्रमिके व्यवसायसत्रेऽपि उल्लेखनीया वृद्धिः अभवत्। निवेशकानां वर्धमानविश्वासेन तथा वैश्विकविपण्याः अनुकूलसङ्केतैः प्रेरितः भारतीयांशविपण्याः व्यवसायः सुदृढताम् प्राप्तवान्।बम्बईशेयरविपण्याः त्रिंशदंशात्मकः सेन्सेक्ससूचकाङ्कः अद्य १,२२५.३२ अङ्कैः (१.६२ प्रतिशतैः) वर्धमानः ७६,९१७.८५ अङ्केषु संवृतः। अनेन सूचकाङ्केन द्विमासिकं उच्चतमस्तरं प्राप्तम्। राष्ट्रियशेयरविपण्याः निफ्टीपञ्चाशत्सूचकाङ्कः अपि ३७०.०५ अङ्कैः (१.५८ प्रतिशतैः) वर्धमानः २३,८१०.८५ अङ्केषु व्यापारस्य समापनम् अकरोत्। निफ्टीसूचकाङ्कः अपि द्विमासिकं उच्चतमं स्तरम् अधिगतवान्।भारतीयांशविपण्याः अस्याः वृद्धेः पृष्ठतः अनेकानि प्रमुखकारणानि सन्ति।प्रथमं, अमेरिका-ईरानयोः मध्ये युद्धसमाप्तेः सम्भावनया वैश्विकनिवेशकानां मनसि आशावादः वर्धितः। द्वितीयं, अपरिष्कृततैलस्य मूल्येषु न्यूनतया भारतीयार्थव्यवस्थायाः कृते अनुकूलं वातावरणं निर्मितम्। तृतीयं, रिलायन्स् इण्डस्ट्रीज् इत्यस्य उत्कृष्टवित्तीयपरिणामैः तस्य अंशेषु क्रयणोत्साहः वर्धितः। एतदतिरिक्तं विदेशीयनिवेशकानां पुनः क्रयणप्रवृत्तिः, प्रमुखसंयन्त्राणां वित्तीयपरिणामेषु सुधारः, तथा च वैश्विकविपण्याः सकारात्मकसङ्केताः भारतीयविपण्याः वृद्धौ महत्त्वपूर्णां भूमिकाम् अवहन्।गतचतुर्षु क्रमिकेषु व्यवसायसत्रेषु भारतीयांशविपण्याम् उल्लेखनीया वृद्धिः अभवत्। अस्मिन् काले सेन्सेक्ससूचकाङ्कः प्रायः ३,६०० अङ्कान् वर्धितवान्। निवेशकानां वर्धमानविश्वासः, अनुकूलवैश्विकपरिस्थितयः तथा प्रमुखसंयन्त्राणां सुदृढवित्तीयप्रदर्शनं च भारतीयशेयरविपण्याः प्रगतौ महत्त्वपूर्णानि कारणानि अभवन्।समग्रतया अद्यतनः व्यापारः भारतीयशेयरविपण्याः सुदृढतां तथा निवेशकानां सकारात्मकदृष्टिकोणं प्रकाशयति।

मुख्यमन्त्रिणः सुक्खू-महोदयस्य घोषणा : आगामिमासात् महिलाः लप्स्यन्ते १५०० रूप्यकाणि; ३०० मात्राकाणि (यूनिट्) निःशुल्कविद्युतः, सोलन-नगरे भविष्यति अधिवेशनम्

हिमसंस्कृतवार्ता — शिमला/भटियातः।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रावोचत् यत् आगामिमासात् 'मुख्यमन्त्री स्वपरिवारः सुखीपरिवारः योजना' (मुख्यमंत्री अपना परिवार सुखी परिवार योजना) प्रारप्स्यते। अस्यान्तर्गततया निर्धनपरिवाराणां योग्याः सर्वाः महिलाः प्रतिमासं १५००-१५०० रूप्यकाणाम् आर्थिकसाहाय्यं लप्स्यन्ते। योजनायाः लाभान्वितपरिवारेभ्यः ३०० मात्राकाणि (यूनिट्) निःशुल्कविद्युतः तथा च स्वास्थ्यबीमापत्रस्य (स्वास्थ्य बीमा कार्ड) माध्यमेन निःशुल्कचिकित्सासुविधा अपि लप्स्यते। सोलन-नगरे आयोज्यमाने अधिवेशने संसत्सदस्यायाः प्रियङ्कागान्ध्याः उपस्थितौ योजनायाः शुभारम्भः विधास्यते। मङ्गलवासरे भटियात-प्रवासकाले मुख्यमन्त्रिणा एषा घोषणा कृता।यस्य परिवारे तिस्रः महिलाः सन्ति, तस्मै प्रतिमासं ४५०० रूप्यकाणि लप्स्यन्ते। आगामिमासात् ३०० मात्राकाणि (यूनिट्) विद्युतः निःशुल्कं लप्स्यते। भटियात-क्षेत्रस्य प्रायः दशसहस्रपरिवारेभ्यः (१०,०००) इयं सुविधा प्रदास्यते। शीघ्रमेव स्वास्थ्यबीमासुविधा अपि उपलप्स्यते।



सुशिक्षितं विधायकं चिनुत

मुख्यमन्त्री सुक्खू-महोदयः जनसामान्यात् सानुरोधम् अवदत् यत् स्वकीय-विधानसभाक्षेत्रात् सुशिक्षितं विधायकं विधानसभां प्रति प्रेषयन्तु, यः युष्माकं ध्वनिम् उत्थापयितुं शक्नुयात्, न तु तत्र उपविश्य केवलं कालं यापयेत्।

डलहौजी-क्षेत्रात् न स्थानान्तरितानि भविष्यन्ति संस्थानानि

मुख्यमन्त्रिणा प्रतिपादितं यत् डलहौजी-विधानसभाक्षेत्रात् किमपि सर्वकारीय-संस्थानं न स्थानान्तरितं भविष्यति। भटियात-क्षेत्रे नूतनानि सर्वकारीयसंस्थानानि उद्घाटयिष्यन्ते।

चुवाड़ी-क्रीडाङ्गनाय १० कोटिरूप्यकाणि

चुवाड़ी-नगरे सिविलन्यायालयः (सिविल कोर्ट), चुवाड़ी-क्रीडाङ्गनाय (स्टेडियम) च १० कोटिरूप्यकाणि प्रदास्यन्ते। भटियात-क्षेत्रे अन्ये सीबीएसई (CBSE)-सम्बद्धाः विद्यालयाः उद्घाटयिष्यन्ते। लघु-सम्पर्कमार्गाणां निर्माणकार्यं सम्पूर्णं विधातुं १० कोटिरूप्यकाणि स्वीकृतानि सन्ति।

चतुर्णां दिनानां कार्यक्रमः आसीत् निश्चितः

मुख्यमन्त्रिणः पूर्वं ३ तः ६ नवम्बर्-दिनाङ्कं यावत् चम्बा-मण्डलस्य प्रवासः पूर्वनिर्धारितः आसीत्। अस्मिन् अन्तराले मुख्यमन्त्रिणा चुराह-भरमौर-विधानसभाक्षेत्रयोः विकासयोजनानाम् उद्घाटनानि शिलान्यासाश्च करणीयानि आसन्। किन्तु विधायकस्य (नन्दलालस्य) आकस्मिकनिधनकारणात् अस्मिन् कार्यक्रमे परिवर्तनानि कृतानि। मुख्यमन्त्री सुक्खू-महोदयः सायं विधायकस्य शवयात्रायां सम्मिलितः जातः।

चुवाड़ी-नगरे पथ-प्रदर्शनम्

मुख्यमन्त्रिणा चुवाड़ी-चौगान-स्थले विविधानां विकासयोजनानाम् उद्घाटन-शिलान्यासानन्तरं जनसभा सम्बोधिता। इतः पूर्वं मार्गयात्रा (रोड शो) अपि सम्पन्ना। सायं ककीरा-क्षेत्रस्य चलामा-मेला-प्राङ्गणे 'सर्वकारः ग्रामस्य द्वारे' (सरकार गांव के द्वार) इत्याख्यः कार्यक्रमः आसीत्, यः साम्प्रतं स्थगितः कृतः अस्ति।

धर्मशालास्थे अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे प्रथमे दिने कन्दुकयष्टीनां द्रुतपतनम्, द्वितीये दिने धावनाङ्कानां वृष्टिः

हिमसंस्कृतवार्ताः- धर्मशाला। धर्मशालास्थे अन्ताराष्ट्रिय-क्रिकेटक्रीडाङ्गणे रणजी- ट्रॉफी- स्पर्धायाः द्वन्द्वे प्रथमे दिने यत्र कन्दुकयष्टीनां (विकेटानां) द्रुतपतनं दृष्टम् आसीत्, तत्रैव द्वितीये दिने धावनाङ्कानां वृष्टिः संवृत्ता। स्पर्धायाः द्वितीये दिवसे राजस्थानदलेन द्वितीयपर्याये (द्वितीयायां पाल्यां) भव्यं कन्दुकाघातनं (बल्लेबाजी) कुर्वता चतुर्णां कन्दुकयष्टीनां हानौ २९७ धावनाङ्काः अर्जिताः। प्रथमपर्याये पञ्चसप्ततिभिः (७५) धावनाङ्कैः पृष्ठतः स्थित्वा अपि राजस्थानदलेन प्रबलं प्रत्यावर्तनं विहितं, कुल-अग्रता च २२२ धावनाङ्कान् यावत् प्रापिता।दलस्य पक्षतः रोहन-विजय-राजभरेण १४० धावनाङ्कानां शतकीयपर्यायः क्रीडितः, यदा तु महिपाल-लोमरोर-महोदयः सप्तनवतिं (९७) धावनाङ्कान् निर्माय केवलं त्रिभिः धावनाङ्कैः शतकात् वञ्चितः अभवत्। प्रथमे दिने कन्दुकक्षेपकाणां प्राबल्यम् आसीत्, उभयोः दलयोः विंशतिः (२०) कन्दुकयष्टयः पतिताः आसन्। राजस्थान-दलस्य प्रथमपर्यायः केवलम् अष्टसप्ततिभिः (७८) धावनाङ्कैः एव समाप्तः जातः आसीत्।

अग्निपथयोजनायाम् अग्निवीराणां सेवाकालः द्वाभ्यां वर्षाभ्यां वर्धयितुं केन्द्रसर्वकारस्य विचारः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः नवदेहली। अग्निपथयोजनायाः अन्तर्गतं कार्यरतानाम् अग्निवीराणां कृते महत्त्वपूर्णा वार्ता समागच्छति। नवीनतमप्रतिवेदनानुसारं केन्द्रसर्वकारः अग्निवीराणां सेवाकालं द्वाभ्यां वर्षाभ्यां वर्धयितुं प्रस्तावम् अन्तिमरूपं दातुं विचारयति इति कथ्यते। यदि एषः प्रस्तावः स्वीकृतः भवति, तर्हि योग्येभ्यः अग्निवीरेभ्यः अतिरिक्तसेवायाः अवसरः प्राप्स्यते।

प्रस्तावितव्यवस्थानुसारम्-

१.द्विवर्षीयः सेवाविस्तारः- पूर्वमेव २५ प्रतिशतं अग्निवीराः स्थायीसेवायै चयनिताः सन्ति। अवशिष्टेषु ७५ प्रतिशतं अग्निवीरेषु चिकित्सावर्गे समाविष्टान् तथा सेवाविस्तारं स्वीकर्तुं नेच्छुकान् सैनिकान् विहाय अन्ये योग्याः अग्निवीराः द्विवर्षीयं सेवाविस्तारं प्राप्तुं शक्नुयुः।

२. स्थायीसेवायां गणना- सेवाविस्तारं स्वीकुर्वतां सैनिकानां अतिरिक्तद्विवर्षीयः सेवाकालः स्थायीसेवायां गणनीयः भवितुम् अर्हति। एतेन नियमितसैनिकानामिव सेवासम्बद्धानां सुविधानां प्राप्तये मार्गः प्रशस्तः भवितुं शक्नोति।

३. ज्येष्ठतायाः समानता- अस्य प्रस्तावस्य सर्वाधिकं महत्त्वपूर्णं पक्षं ज्येष्ठतासम्बद्धः अस्ति। प्रस्तावितव्यवस्थायां चतुर्वर्षीयसेवानन्तरं स्थायीसेवायां नियुक्तानाम् अग्निवीराणां तथा द्विवर्षीयसेवाविस्तारं स्वीकृतवतां सैनिकानां मध्ये ज्येष्ठताविषये समानता स्थापयितुं विचारः प्रचलति। अत्र उल्लेखनीयम् ७५ अन्तिमस्वरूपं स्पष्टं भविष्यति।

मुख्यमन्त्रियुवा- उद्यमी-विकास- अभियानस्य प्रगतिसमीक्षार्थं उपवेशनम् विकासभवने बैंकाधिकारिभ्यः लम्बित- प्रार्थनापत्राणां शीघ्रनिस्तारणस्य निर्देशः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः

०३.११.२०२६ तमे दिने विकासभवने स्थिते कार्यालयकक्षे मुख्यमन्त्रि- युवा- उद्यमी विकास- अभियानयोजनायाः प्रगतिविषये समीक्षा- उपवेशनस्य आयोजनं कृतम्।अस्मिन् उपवेशने उपायुक्तः उद्योगः, अग्रणीबैंकस्य अधिकारी, जनपदस्य समस्तबैंकानां नोडल अधिकारिणश्च उपस्थिताः आसन्।उपवेशने वित्तकोशेषु लम्बितानि आवेदनपत्राणि यथाशीघ्रं निस्तारयितुं, वर्तमानवित्तीयवर्षे प्राप्तानां लक्ष्यानां सापेक्ष्ये शतप्रतिशतं लक्ष्यपूर्तिं सुनिश्चितं कर्तुं सर्वेभ्यः बैंकाधिकारिभ्यः आवश्यकाः निर्देशाः प्रदत्ताः। योजनायाः प्रभावीक्रियान्वयनं, युवभ्यः स्वरोजगारस्य अवसरप्रदानम्, उद्यमितायाः प्रोत्साहनं च अस्याः उपवेशनस्य प्रमुखम् उद्देश्यम् आसीत्।

प्रकृतेः संरक्षणं, भविष्यस्य संवर्धनम् जैवमण्डलारक्षितक्षेत्राणि जैवविविधतायाः संरक्षणे महत्त्वपूर्णां भूमिकां निर्वहन्ति।



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः नवदेहली। जैवमण्डलारक्षितक्षेत्राणि जैवविविधतायाः संरक्षणे, वैज्ञानिकानुसन्धानस्य प्रोत्साहने, जनसामान्यस्य जीविकोपार्जनाय सततावसराणां संवर्धने च महत्त्वपूर्णां भूमिकां निर्वहन्ति। एतानि क्षेत्राणि प्रकृतिसंरक्षणस्य जनकल्याणस्य च मध्ये सन्तुलनं स्थापयितुं विशेषरूपेण सहायकानि भवन्ति। भारते अधिसूचितानि अष्टादश जैवमण्डलारक्षितक्षेत्राणि देशस्य पारिस्थितिकीतन्त्रस्य संरक्षणाय तथा भाविपीढीनां कृते प्राकृतिकसम्पदां सुरक्षितरूपेण संरक्षितुं राष्ट्रस्य प्रतिबद्धतां प्रतिबिम्बयन्ति।
प्रकृतेः संरक्षणं केवलं वर्तमानकालस्य आवश्यकता नास्ति, अपि तु आगामिन्याः पीढ्याः सुरक्षितस्य समृद्धस्य च भविष्यस्य आधारशिला अपि अस्ति।

प्रधानाचार्यपदानाम् आवेदनार्थम् अनुभवप्रमाणपत्रं न प्रदत्तम्, शिक्षकसंघेन प्रकटितः रोषः

- **उत्तरप्रदेश- माध्यमिक- शिक्षक-संघस्य प्रतिनिधिमण्डलेन जिलाधिकारिणे समर्पितं चतुर्बिन्द्वात्मकं ज्ञापनम्।**
- **प्रोजेक्ट- अलंकारयोजनायाः द्वितीय-देयधनराशेः अविलम्बं निर्गमनं कर्तुम् आग्रहः।**



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सन्तकबीरनगरम्। मङ्गलवासरे उत्तरप्रदेश-माध्यमिक- शिक्षकसंघस्य प्रतिनिधिमण्डलेन जिलाधिकारिणं मिलित्वा चतुर्बिन्द्वात्मकं ज्ञापनं समर्पितम्। अस्मिन् अवसरे शिक्षकाणां विविधाः समस्याः अधिकृत्य विस्तृतः संवादः अपि कृतः।संघस्य प्रदेशमन्त्री सञ्जयद्विवेदी उक्तवान् यत् जिला विद्यालय निरीक्षकः उत्तरप्रदेश-शिक्षा- सेवा- चयनायोगेन, प्रयागराजेन विज्ञापितानां प्रधानाचार्य- प्रधानाध्यापकपदानां कृते आवेदनार्थम् आवश्यकानि अनुभवप्रमाणपत्राणि न निर्गमयति। प्रमाणपत्राणाम् अप्राप्त्या अनेके शिक्षकाः आवेदनप्रक्रियायां भागं ग्रहीतुं वञ्चिताः भविष्यन्ति। तेन उक्तं यत् चयनवेतनमानसम्बद्धाः अनेके प्रकरणाः विगतेषु चतुर्षु मासेषु जिला विद्यालय निरीक्षककार्यालये लम्बिताः सन्ति। पुनः पुनः अनुरोधं कृत्वा अपि तेषां निस्तारणं न क्रियते। व्यक्तिगतशिक्षकान् कार्यालयम् आहूय आपत्तीनां नाम्ना अनावश्यकं प्रपीड्यते। जनपदस्य अनेकविद्यालयानां शिक्षकाणां अवशिष्ट- देयकसम्बद्धम् एरियरधनं लम्बितम् अस्ति। अस्य भुगतानार्थं देयकविलानि बहुमासेभ्यः जिला विद्यालय निरीक्षककार्यालये समर्पितानि सन्ति, तथापि अद्यावधि भुगतानं न कृतम्। प्रोजेक्ट-अलंकारयोजनायाः अन्तर्गतं जनपदस्य सप्तमाध्यमिकविद्यालयेषु निर्माणाधीनभवनानां निर्माणकार्याय द्वितीयकिस्तस्य धनराशिः अगस्तमासे निर्गता अस्ति। किन्तु सा धनराशिः अद्यापि जनपदस्य कोषागारे एव अवरुद्धा अस्ति। विद्यालयैः स्वांशस्य पञ्चविंशतिप्रतिशतं धनराशिः अपि निक्षेपिता अस्ति। तथापि जिला विद्यालय निरीक्षकस्य तथा पटलसहायकानां उदासीनतया उक्ता धनराशिः विद्यालयप्रबन्धकानां खातेषु स्थानान्तरिता न भवति। फलतः निर्माणकार्यं निर्धारितसमये सम्पादयितुं बाधा उत्पद्यते।
जिलाधिकारिणः समागमात् अनन्तरं प्रतिनिधिमण्डलं जिला विद्यालय निरीक्षकम् उपेन्द्रकुमारम् अपि मिलित्वा ज्ञापनं समर्पितवान्। तेन पटलसहायकान् आहूय सर्वासां समस्याणां शीघ्रं निस्तारणाय निर्देशः प्रदत्तः। बौरव्यास-प्रधानाचार्यस्य निलम्बनप्रकरणे अनुमोदनं प्रदत्तम् इत्यस्मिन् विषये अपि संघेन असन्तोषः प्रकटितः। अस्मिन् अवसरे संघस्य जिलामन्त्री गिरिजानन्दयादवः अपि उपस्थितः आसीत्।

'जागरण-विमर्श'-कार्यक्रमे जनपदस्य समग्रविकासविषये विचारविमर्शः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदस्य सिद्धार्थनगरे स्थिते टीजीआर-होटले दैनिकजागरणसमाचारपत्रस्य तत्वावधाने आयोजिते 'जागरण-विमर्श' कार्यक्रमे सहभागिता कृता। अस्मिन् सत्रे 'आकांक्षी जनपदम् एवं अर्थव्यवस्था- विकासस्य नवीनमार्गाः' इति विषये आयोजितायां चर्चायां जनपदस्य समग्रविकासः, आर्थिकप्रगतिः, रोजगारस्य नवीनावसराणां सृजनम् तथा विकासस्य विविधसम्भावनाः इत्यादिविषयेषु स्वविचाराः प्रस्तुताः।कार्यक्रमे जिलाधिकारी सिद्धार्थनगरस्य डॉ. शिवशरणप्पा, पुलिस अधीक्षकस्य अभिषेक महाजनस्य च सहिताः वरिष्ठाधिकारिणः, जनप्रतिनिधयः अन्ये गणमान्यजनाश्च उपस्थिताः आसन्। कार्यक्रमस्य आयोजकदले ब्यूरोप्रमुखः जितेन्द्रपाण्डेयः, बांसी-तहसीलप्रभारी रितेश बाजपेयी, फिरोजखानः, राकेशमिश्रः च सहिताः सर्वे आयोजकाः उपस्थिताः आसन्। कार्यक्रमस्य सफलायोजने सहयोगं प्रदत्तवद्भ्यः सर्वेभ्यः आयोजकेभ्यः कृतज्ञता व्यक्ता।

रामपुरक्षेत्रस्य विधायकस्य नन्दलालस्य निधनम्, २००७ तमे वर्षे प्रथमवारं प्रविष्टवान् आसीत् विधानसभायाम्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य शिमला- मण्डलस्थ- रामपुर- विधानसभा-क्षेत्रस्य विधायकः नन्दलाल-महोदयः मङ्गलवासरे, ३ नवम्बर २०२६ दिनाङ्के दिवङ्गतः। तस्य निधनवार्तायाः प्रसारानन्तरं रामपुर-क्षेत्रे शोकव्याकुलं वातावरणं वर्तते। नन्दलालः द्विसप्ततिवर्षीयः (७२) आसीत्। नन्दलालेन सर्वकारीयसेवातः राजनीतिपर्यन्तं यात्रा कृता आसीत्। निर्वाचन-राजनीत्यां प्रवेशात् पूर्वं तेन भारत-तिब्बतसीमा-आरक्षिदले (ITBP) स्वकीयाः सेवाः प्रदत्ताः आसन्। एतदतिरिच्य तस्मै विशेष- सुरक्षासमूहे (SPG) अपि कार्यकरणस्य अनुभवः आसीत्। सर्वकारीयसेवातः ऐच्छिकनिवृत्तिं (VRS) स्वीकृत्य सः काङ्ग्रेसमाध्यमेन राजनीतौ प्रविष्टवान्।



२००७ तमे वर्षे प्रथमवारम् अभवत् विधायकः

नन्दलालः २००७ तमे वर्षे रामपुर- विधानसभा-क्षेत्रात् स्वकीयं प्रथमं निर्वाचनम् अयोधयत्। अस्मिन् निर्वाचने सः भाजपा-प्रत्याशिनं बृजलालम् ६,४७० मतैः पराजितवान्। तदनन्तरं सः कदापि पृष्ठतः न दृष्टवान्। २०१२ तमस्य वर्षस्य विधानसभानिर्वाचने सः ९,४७१ मतानाम् अन्तरेण विजयं सम्प्राप्तवान्। २०१७ तमे वर्षे अपि सः ४,०३७ मतैः विजयी अभवत्। २०२२ तमस्य वर्षस्य निर्वाचने स्पर्धा अतीव समीपवर्तिनी आसीत्, स च ५६७ मतानाम् अन्तरेण विजयं पञ्जीकृतवान्। एवं प्रकारेण नन्दलालः निरन्तरं चत्वारि विधानसभा-निर्वाचनानि जित्वा रामपुरस्य प्रतिनिधित्वम् अकरोत्।

सुरक्षादलात् राजनीतिपर्यन्तं यात्रा

नन्दलालस्य जन्म १६ एप्रिल् १९५४ दिनाङ्के रामपुर- बुशहरस्य देवठीग्रामे अभवत्। सः हिमाचलप्रदेश- विश्वविद्यालयात् राजनीतिविज्ञाने स्नातकोत्तर-पदवीं (MA) प्राप्तवान् आसीत्। शिक्षानन्तरं सः आईटीबीपी (ITBP) दले सेवाः प्रारभत। सुरक्षाक्षेत्रे कार्यकरणकाले सः कमाण्डो-दलेन एसपीजी (SPG) दलेन सह अपि संलग्नः आसीत्। अनन्तरम् ऐच्छिक-निवृत्तिं स्वीकृत्य सः सार्वजनिकजीवने राजनीतौ च सक्रियां भूमिकां निर्वोढुम् आरभत।

सर्वकारे विधानसभायां च निरूढानि महत्त्वपूर्णाणि दायित्वानि

विधायकत्वप्राप्त्यनन्तरं नन्दलालाय २०१३ तमे वर्षे मुख्य- संसदीय- सचिवस्य दायित्वं समर्पितम् आसीत्। विधानसभायाम् अपि सः विविधानां समितीनां माध्यमेन कार्यम् अकरोत्। २०२२ तमे वर्षे चतुर्थवारं निर्वाचने विजयानन्तरं सः विधानसभायाः कल्याणसमित्याः अध्यक्षः कृतः।

ततः परं मार्च २०२४ मध्ये प्रदेशसर्वकारेण सः सप्तम- राज्य- वित्त-आयोगस्य अध्यक्षः नियुक्तः। अस्मिन् पदे तस्मै मन्त्रिमण्डलीयमन्त्रिणः (कैबिनेट- मन्त्रिणः) पदवी अपि प्रदत्ता आसीत्। नन्दलालः पूर्वमुख्यमन्त्रिणः वीरभद्रसिंहस्य विश्वस्तेषु निकटेसु च नेतृषु गण्यते स्म। रामपुर-विधानसभाक्षेत्रे तस्य राजनैतिकयात्रा सार्धैकदशकाद् (१५ वर्षेभ्यः) अपि अधिकं कालं यावत् सक्रिया आसीत्। तस्य निधनेन रामपुरक्षेत्रेण स्वस्य दीर्घकालं यावत् प्रतिनिधित्वं कुर्वन् जनप्रतिविधिः विलोपितः।

नन्दलालस्य निधने रामपूरे अन्ताराष्ट्रिय- लवी- मेलायाः पूर्वनिर्धारिताः गतिविधयः स्थगिताः

रामपुर-विधानसभा-क्षेत्रस्य विधायकस्य सप्तम-राज्य- वित्त-आयोगस्य च अध्यक्षस्य नन्दलालस्य आकस्मिकनिधने उपमण्डल- प्रशासनेन रामपुर-बुशहरेण गभीरः शोकः प्रकटितः। प्रशासनेन तस्य निधनं रामपुरक्षेत्राय समग्रप्रदेशाय चापूरणीया क्षतिः इति प्रतिपादितम्।उपमण्डलाधिकारिणा (नागरिक) हर्ष- अमरेन्द्रसिंहेन उक्तं यत् नन्दलालः स्वकीये सार्वजनिकजीवने क्षेत्रस्य विकासाय समाजाय च समर्पितः आसीत्। तस्य योगदानं क्षेत्रविकासाय च कृतानि कार्याणि सर्वदा संस्मरिष्यन्ते।

प्रशासनपक्षतः दिवङ्गतायाः आत्मनः शान्तये प्रार्थनां कुर्वद्भिः शोकसन्तप्तपरिवाराय गभीराः संवेदनाः प्रकटिताः। सहैव ईश्वरात् परिवारजनेभ्यः शुभचिन्तकेभ्यश्च अस्मिन् कठिनसमये दुःखसहनस्य शक्तिप्रदानाय याचना कृता। नन्दलालस्य निधनकारणात् प्रशासनेन मङ्गलवासरे, ३ तथा ४ नवम्बर २०२६ दिनाङ्कयोः अन्ताराष्ट्रिय- लवीमेला-२०२६ इत्याख्यायाः अन्तर्गततया आयोज्यमानाः पूर्वनिर्धारिताः गतिविधयः स्थगिताः कृताः।



काशी हिन्दूविश्वविद्यालये पुरुषार्थविमर्शविषये अखिलभारतीय- संगोष्ठ्याः आयोजनम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, वाराणसी। काशी हिन्दूविश्वविद्यालयस्य संस्कृतविद्या-धर्मविज्ञानसङ्कायस्य धर्मशास्त्र- मीमांसा- विभागस्य तत्त्वावधानेन २०२६ तमस्य वर्षस्य नवम्बरमासस्य ०३-०४ दिनाङ्कयोः द्विदिवसीया अखिलभारतीयसंगोष्ठी आयोज्यते।संगोष्ठ्याः मुख्यविषयः 'भारतीयज्ञानपरम्परायां पुरुषार्थविमर्शः' इति निर्धारितः अस्ति। अस्यां संगोष्ठ्यां भारतीयज्ञानपरम्परायां धर्म- अर्थ- काम-मोक्षरूपाणां चतुर्णां पुरुषार्थानां विविधपक्षेषु विद्वद्भिः विचारविमर्शः विधास्यते। कार्यक्रमः संस्कृतविद्या-धर्मविज्ञानसङ्कायस्य सभागारे (SVDV) सम्पन्नः भविष्यति। संगोष्ठ्यां सहभागितायै पञ्जीकरणार्थं धर्मशास्त्र- मीमांसा-विभागस्य शोधच्छात्रेण सन्नी पाण्डेयेन सह ८२८२८२६५४६ इति दूरभाषसङ्ख्यायां सम्पर्कः कर्तुं शक्यते।आयोजकः-धर्मशास्त्रमीमांसाविभागः, संस्कृतविद्या-धर्मविज्ञानसङ्कायः, काशी हिन्दू-विश्वविद्यालयः, वाराणसी।

न्यूट्रिजिनोमिक्स् एवं सटीकपोषणविषये विशेषव्याख्यानम् आयोजितम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्। महायोगी- गोरखनाथ-विश्वविद्यालयस्य स्वास्थ्यजीवनविज्ञानसङ्कायान्तर्गतं जैवरसायनविभागेन 'न्यूट्रिजिनोमिक्स्, सटीकपोषणम् एवं मानवस्वास्थ्यं' इति विषये विशेषातिथिव्याख्यानस्य आयोजनं कृतम्।

कार्यक्रमे मुख्यवक्तारूपेण एम्स् गोरखपुरस्य जैवरसायनविभागस्य सहाचार्यः डॉ. शैलेन्द्र द्विवेदी आधुनिकजीवनशैल्याः कारणेन वर्धमानानां मधुमेह- स्थौल्य- हृदयरोगादीनां निवारणे जैवरसायनशास्त्रस्य महत्त्वं प्रतिपादितवान्। आनुवंशिक- संरचनायाः, डीएनए, चयापचय-प्रक्रियायाः विश्लेषणेन व्यक्तिनिष्ठ-पोषणयोजनायाः निर्माणं सम्भवमिति सः अवदत्।

विभागाध्यक्षा डॉ. प्रेरणा अदितिः विद्यार्थिनः नवीनवैज्ञानिकानुसन्धानैः संयोजयितुं विश्वविद्यालयस्य प्रतिबद्धतां व्यक्तवती। सङ्कायाधिष्ठाता प्रो. सुनीलकुमारसिंहः न्यूट्रिजिनोमिक्स इत्यस्य भविष्यस्य रोगनिवारक-चिकित्सायां महत्त्वं प्रतिपादितवान्। कार्यक्रमे डॉ. प्रियङ्का तिवारी, डॉ. अल्का सिंहः, डॉ. धनञ्जय पाण्डेयः सहिताः १२० छात्राः उपस्थिताः आसन्।

केन्द्रीय- संस्कृत- विश्वविद्यालये
सरदार- वल्लभभाई- पटेलमहोदयस्य १५१ तमे
जयन्त्युत्सवे राष्ट्रियैकतादिवसस्य शपथग्रहणसमारोहः आयोजितः



हिमसंस्कृतवार्ताः- नवदेहली।

केन्द्रीय- संस्कृत- विश्वविद्यालये नवदेहल्यां 'लौहपुरुषस्य' सरदार- वल्लभभाई- पटेल- महोदयस्य १५१ तमायाः जयन्त्याः उपलक्ष्ये राष्ट्रिय- एकता- दिवसान्तर्गततया शपथग्रहणसमारोहः आयोजितः। २ नवम्बर् २०२६ दिनाङ्के विश्वविद्यालयमुख्यालये आयोजिते समारोहे कुलपतिना प्रो. श्रीनिवास वरखेडीमहोदयेन अधिकारिभ्यः कर्मचारिभ्यश्च राष्ट्रस्य एकताम्, अखण्डतां, सुरक्षां च संरक्षयितुं शपथः कारितः।

अस्मिन् अवसरे कुलपतिमहोदयेन लौहपुरुषस्य सरदार- वल्लभभाई- पटेलस्य राष्ट्रनिर्माणे अतुलनीयस्य योगदानस्य संस्मरणं कुर्वता तस्यादर्शानाम् आत्मसात्करणाय, राष्ट्रियैकतायाः, अखण्डतायाः, समरसतायाश्च प्रति सर्वदा कटिबद्धतायै सन्देशः प्रदत्तः। समारोहे कुलसचिवः प्रो. आर. जी. मुरलीकृष्णः, आईक्यूएसी (IQAC) निदेशकः प्रो. सुकान्तकुमार सेनापतिः, शैक्षणिकाधिष्ठाता प्रो. ललितकुमार त्रिपाठी, प्रो. मधुकेश्वरभट्टः, प्रो. शिवानी वी. च सहिताः विश्वविद्यालयस्य अधिकारिणः कर्मचारिणश्च उपस्थिताः आसन्।



आयुर्वेदस्य स्वस्थवृद्धावस्थायाश्च
वैज्ञानिकविमर्शाय
राष्ट्रियसम्मेलनं 'दीर्घायुः- २०२६'

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्, नवम्बर ३, २०२६। महायोगी गोरखनाथ- विश्वविद्यालयस्य गुरु गोरक्षनाथ आयुर्वेद- चिकित्सा- विज्ञानसंस्थाने भारतीय- ज्ञान- परम्पराकेन्द्रस्य तत्त्वावधाने नवम्बरमासस्य ४ तः ६ दिनाङ्कपर्यन्तं त्रिदिवसीयराष्ट्रियसम्मेलनस्य 'दीर्घायुः-२०२६' आयोजनं भविष्यति।अस्मिन् सम्मेलने देशस्य विभिन्नप्रदेशेभ्यः सप्तशताधिकाः चिकित्सकाः, शिक्षाविदः, शोधकर्तारः, आयुर्वेदविशेषज्ञाश्च सहभागिनः भविष्यन्ति। विंशतिः औषधिनिर्माणसंस्थाः अपि स्वोत्पादानां नवीनानुसन्धानानां च प्रदर्शनं करिष्यन्ति।उद्घाटनसमारोहे मुख्यातिथिरूपेण केन्द्रीय- आयुर्वेदीय- विज्ञानानुसन्धानपरिषदः उपमहानिदेशकः डॉ. श्रीकान्त नारायणम उपस्थितः भविष्यति। सम्मेलनस्य अध्यक्षतां विश्वविद्यालयस्य कुलपतिः लेफ्टिनेन्ट जनरल डॉ. भूपेशकुमारगोयलः करिष्यति।द्वितीयदिवसे आयुर्वेदस्य वृद्धावस्थाचिकित्सायाश्च सम्बन्धे वैज्ञानिकसत्राणि, शोधपत्रप्रस्तुतयः तथा 'अभिव्यक्तिः-२०२६' इति सांस्कृतिककार्यक्रमः आयोजितः भविष्यति।नवम्बरमासस्य ६ दिनाङ्के धन्वन्तरिजयन्त्याः पावनावसरे भगवान् धन्वन्तरेः यज्ञः आयोजितः भविष्यति। समापनसमारोहे उत्कृष्टशोधकर्तारः प्रतिभागिनश्च पुरस्कृताः भविष्यन्ति तथा सहयोगिनः सम्मानिताः भविष्यन्ति। अस्य सम्मेलनस्य प्रमुखम् उद्देश्यम् आयुर्वेदस्य प्राचीनज्ञानस्य आधुनिकचिकित्साविज्ञानेन समन्वयं कृत्वा स्वस्थसम्मानपूर्णवृद्धावस्थायाः अवधारणायाः प्रोत्साहनम् अस्ति।

इण्टैक मण्डी चैप्टर इत्यस्य राज्यस्तरीय- धरोहरप्रश्नोत्तरी प्रतियोगितायां चतुरः जनपदानां विद्यार्थिनः भागं गृहीतवन्तः



धरोहरसंरक्षणं प्रति जागरूकतायाः विकासे युवानां भूमिका महत्त्वपूर्णा अस्ति- डॉ. राकेश कुमार शर्मा

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, मंडी।

भारतीय- सांस्कृतिक- निधिः इण्टैक इत्यस्य मण्डी चैप्टर इत्यनेन होटल राजमहल मण्डी इत्यत्र राज्यस्तरीय- धरोहरप्रश्नोत्तरी- प्रतियोगितायाः आयोजनं कृतम्। प्रतियोगितायां सरदारपटेल- विश्वविद्यालयः मण्डी इत्यस्य इतिहासविभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा मुख्यातिथिरूपेण सहभागितां कृतवान्। इण्टैक मण्डी चैप्टर इत्यस्य संयोजकः नरेशमल्होत्रा स्वागतं कुर्वन् अवदत् यत् प्रतियोगितायाः उद्देश्यं विद्यालयीयविद्यार्थिषु भारतीय- इतिहासस्य सांस्कृतिकधरोहरस्य तस्य संरक्षणं च प्रति जागरूकतायाः विकासः अस्ति। अस्मिन् अवसरे मुख्य अतिथिः डॉ. राकेशशर्मा अवदत् यत् ऐतिहासिकी संस्कृतेः धरोहरस्य संरक्षणं केवलम् अतीतानां धरोहरणां संरक्षणं नास्ति अपि तु स्व सांस्कृतिक- अस्मितायाः ऐतिहासिक- चेतनायाः सामूहिकस्मृतेः च अक्षुण्णस्थापनायाः दायित्वम् अस्ति। सः अवदत् यत् इतिहास-धरोहरस्य अध्ययनं विद्यार्थिषु वैज्ञानिकं दृष्टिकोणं, तार्किकं चिन्तनं स्वसभ्यतां प्रति गाम्भीर्येण अवगमनं च विकासयति। सः युवान् आह्वानम् अकरोत् यत् ते स्वस्थानीय- ऐतिहासिक धरोहरणां लोकपरम्पराणां पारम्परिक- ज्ञानसम्पदायाः च संरक्षणे सक्रियां भूमिकां निर्वहेयुः, तान् च आगामिपीढीः यावत् सुरक्षिताः प्रेषयितुम् सङ्कल्पं कुर्युः।

सः अवदत् यत् प्रश्नोत्तरी प्रतियोगिताः विद्यार्थिषु जिज्ञासा ज्ञानार्जनप्रवृत्तेः प्रोत्साहनस्य प्रभावी माध्यमम् सन्ति।इण्टैक मण्डी चैप्टरस्य संयोजकः नरेश मल्होत्रा सूचितवान् यत् अस्मिन् प्रतियोगितायां कांगड़ा, शिमला, मण्डी, धर्मशाला चैप्टर इत्येतेषां जनपदस्तरीयानां प्रश्नोत्तरीप्रतियोगितानां विजेतारः चत्वारि दलानि भागं गृहीतवन्तः। प्रतियोगितायाः सञ्चालनम् इण्टैक नवदेहली मुख्यालयस्य धरोहर- शिक्षासञ्चार- प्रभागस्य सदस्यौ अभिषेकः, दीपांशुः च कृतवन्तौ। प्रतियोगितायाः माध्यमेन चयनितं राज्यस्तरीयदलं दिसम्बर द्विसहस्र षड्विंशति तमे वर्षे नवदेहली इत्यत्र आयोजिते राष्ट्रीय- धरोहर- प्रश्नोत्तरीप्रतियोगितायां हिमाचलप्रदेशस्य प्रतिनिधित्वं करिष्यति। इण्टैक इत्यस्य सह संयोजकः अनिलशर्मा धन्यवादप्रस्तावं प्रस्तुतवान्। प्रतियोगितायां शिमला इत्यस्मात् आर्शितशर्मा वरेण्यमः च प्रथमस्थानं, मण्डी इत्यस्मात् सान्वी यक्षितः च द्वितीयस्थानं, धर्मशाला इत्यस्मात् अनन्यः, नैना च तृतीयस्थानं, कांगड़ा इत्यस्मात् अलंकृतिः मारुतः च चतुर्थस्थानं प्राप्तवन्तौ। कार्यक्रमे इण्टैक इत्यस्य संयोजकः नरेशमल्होत्रा सह समन्वयकः अनिलशर्मा सदस्याः डॉ हरीशबहलः, अजय सहगलः, कमलकांतशर्मा गजेंद्र बहलः, ललितकपूरः, महेशपुरी, राजीववैद्यः, कैप्टन वाई. सी. वैद्यः, हंसराज मल्होत्रा, बनीता मल्होत्रा, नीरजा, निर्मल वर्मा, हेमलता पुरी, इन्दुः, मृदु गोयलः, पुष्पा ठाकुरः, रजनी शर्मा, प्रेम, वर्षा, हितेशः, वैद्यः वीरेंद्र गुलेरिया इत्येतैः सह गणमान्याः सदस्याः च उपस्थिताः आसन्।

पेज बचाओ वृक्ष बचाओ अभियान के अन्तर्गत हिमसंस्कृतम् न्यास (पं.86/2026) द्वारा ई-दैनिक संस्कृत समाचार पत्र की पहल हिमसंस्कृतवार्ता

बस्तीपुलिसस्य महती उपलब्धिः

१५६ चोरिताः चलदूरवाण्यः प्राप्ताः, मूल्यं प्रायः अष्टाविंशतिलक्षरूप्यकाणि।



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः बस्ती। उत्तरप्रदेशस्य बस्तीजनपदस्य पुलिसस्य सर्विलांस-प्रकोष्ठेन विभिन्नकम्पनीनां १५६ चोरिताः चलदूरवाण्यः प्राप्ताः। एतेषां अनुमानितं मूल्यं प्रायः अष्टाविंशतिलक्षरूप्यकाणि (२८,००,०००) अस्ति। सर्विलांसप्रकोष्ठस्य प्रभारी शेषनाथ यादवः स्वकीयेन दलसहितः CEIR पोर्टलद्वारा प्राप्तानाम् आवेदनपत्राणां संज्ञानं गृहीत्वा एतान् चलदूरवाणीः अन्विष्य प्राप्तवान्। अस्मिन् अभियाने मुख्यारक्षी देवेश यादवः, सतेन्द्र सिंहः, दीपक कुमारः, विक्रम सिंहः, सन्तोष कुमार यादवः, अंगद यादवः, किशन सिंहः सक्रियं योगदानम् अददुः।

उल्लेखनीयम् अस्ति यत् जनवरीमासात् २०२६ आरभ्य अद्यावधि पुलिसदलेन ७४३ चलदूरवाण्यः प्राप्ताः। अस्मिन् विषये पुलिसाधीक्षकः ओमवीर सिंहः पुलिसलाइनस्थले पत्रकारसम्मेलनम् आयोज्य सम्पूर्णां घटनां विस्तरेण अवदत्। अस्मिन् अवसरे प्राप्तेषु १५६ चलदूरवाणिषु १२६ चलदूरवाण्यः तेषां वास्तविकेभ्यः उपभोक्तृभ्यः प्रत्यर्पिताः।

चलदूरवाणीप्राप्तानां केचन उपभोक्तारः

१. जगदीशकुमारः – आराजी दुही पिठिया लश्करे, गौर।
२. अजीतः – टिनिच, गौर।
३. शिवमः – नरायनपुर, हर्रैया।
४. रमेशकुमारसिंहः – पूरे अलावल, हर्रैया।
५. सुशीला देवी – गौहनिया, हर्रैया।
६. शाहिदखानः – मनिकरपुर, हर्रैया।
७. अमरेशपाण्डेयः – चौधरिया, परसरामपुर।
८. मोहितः – बेलाडे शुक्ल, हर्रैया।
९. कल्याणसिंहः – परीक्षाभिण्ड, मध्यप्रदेशः।
१०. सीमा – पड़री, गौर।
११. राजेशकुमारः – पीठपुर, हर्रैया।
१२. रेनूसिंहः – मरवटिया, हर्रैया।
१३. विकासः – बौखारी, पैकोलिया।
१४. सन्तोषकुमारः – खेमराजपुर, छावनी।
१५. जशवन्तकुमारः – एकला, छावनी।
१६. विकासअग्रहरिः – मुसहा वरपेडा, पैकोलिया।
१७. जमुना – बाघानाला, छावनी।
१८. विकासशुक्लः – नगरबाजार, बस्ती।
१९. सोनूयादवः – बस्थनवा, पैकोलिया।
२०. रामनेवासः – कोठवा भरतपुर, नगर।

अन्येषु उपभोक्तृषु बस्तीजनपदस्य विभिन्नक्षेत्राणां तथा उत्तरप्रदेशस्य अन्यजनपदानां, मध्यप्रदेशस्य, महाराष्ट्रस्य, हरियाणायाः, पंजाबस्य एवं बिहारस्य निवासीजनाः अपि सन्ति। पुलिसप्रशासनस्य अस्य प्रयासस्य जनसामान्येन प्रशंसा कृता। गुमशुदानां चलदूरवाणीनां पुनः प्राप्त्या नागरिकेषु पुलिसप्रति विश्वासः वर्धितः।

विशेषम्- पुलिसदलेन जनवरी २०२६ तः अद्यावधि ७४३ चलदूरवाणीनां प्राप्तिः कृता, यत् सर्विलांसप्रकोष्ठस्य उल्लेखनीया उपलब्धिः अस्ति।

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य मया अति-विचित्रे द्वे वार्ते आनीते।

नन्दिनी- विचित्रे वार्ते! अतीव कुतूहलं जातम्। का सा प्रथमा वार्ता?

काव्या- प्रथमा वार्ता नवजिलैण्ड्-देशस्य। तत्र अरण्ये केचन नूतनाः वृक्षाः आरोपिताः। किन्तु रात्रौ चौरैः चत्वारिंशत् (४०) वृक्षाः भूमेः उत्खाताः अपहृताः च!

नन्दिनी- अहो! वृक्षाः एव चौरैः चोरिताः! प्रायः चौरैः सुवर्णं वा धनं वा ह्रियते, किन्तु वृक्षाणां चौर्यं महदाश्चर्यम्। द्वितीया वार्ता का अस्ति?

काव्या- द्वितीया वार्ता मिशिगन्-राज्यस्य अस्ति। तत्र एकः नरः शीतपेयं क्रेतुम् आपणं गतः। किन्तु तस्य धनस्यूते पर्याप्तं धनं न दृष्टम्।

नन्दिनी- स्यूते धनं न दृष्टम्! एवं सति तेन शीतपेयस्य मूल्यं कथं दत्तम्?

काव्या- तेन स्वस्यूतात् काचित् पुरातनी द्यूतचीटिका आपणिकाय दत्ता। परीक्षणानन्तरं तदा एव ज्ञातं यत् तया चीटिकया तेन दशलक्ष-डॉलर-परिमितं धनं जितम्! मासद्वयं सा चीटिका तस्य स्यूते एव स्थिता।

नन्दिनी- अहो! सः नरः केवलं पेयाय गतः, परन्तु दशलक्ष-धनं लब्धम्! सः अतीव भाग्यशाली। एतादृशीनां विस्मयकरीणां वार्ताणां कृते कृतज्ञताम् अर्पयामि तुभ्यम्।

काव्या- स्वागतं नन्दिनि। शुभमस्तु।

-ईदर धीरजः

अमृताप्रीतम्-स्मृतौ काव्यगोष्ठी आयोजिता—साहित्यिकविमर्शैः काव्यप्रस्तुतिभिश्च समृद्धः कार्यक्रमः



काव्योम-फाउण्डेशन इत्यस्य लखनऊविश्वविद्यालयीय-एककेन आयोजितायां गोष्ठ्यां माण्डवीवर्मा मुख्यवक्त्री, ग्रेसीसिंहः सहायकवक्त्री च आस्ताम्।

हिमसंस्कृतवार्ताः।

काव्योम-फाउण्डेशनस्य लखनऊविश्वविद्यालयीय-एककस्य तत्त्वावधाने प्रसिद्धायाः पञ्जाबी-हिन्दीभाषयोः लेखिकायाः, उपन्यासकारिण्याः कवयित्र्याश्च अमृताप्रीतम्-महोदयायाः पुण्यतिथेः उपलक्ष्ये साहित्यिकगोष्ठी आयोजिता। गोष्ठ्याम् माण्डवीवर्मा मुख्यवक्त्रीरूपेण तथा ग्रेसीसिंहः सहायकवक्त्रीरूपेण उपस्थिते आस्ताम्। कार्यक्रमस्य सञ्चालनं कृषिका अकरोत्। अस्मिन् अवसरे हास्यव्यङ्ग्यकविः सन्दीपअनुरागी विशिष्टतया उपस्थितः आसीत्। गोष्ठ्याः प्रथमसत्रे मुख्यवक्त्री माण्डवीवर्मा अमृताप्रीतम्-महोदयायाः व्यक्तिगतजीवनस्य साहित्यिकयात्रायाश्च विषये विस्तरेण प्रकाशं कृतवती। तया अमृताप्रीतम्-महोदयायाः जीवने इमरोज-महोदयेन साहिरलुधियानवी-महोदयेन च सह सम्बन्धानां विविधपक्षाणामपि चर्चा कृता। सहायकवक्त्री ग्रेसीसिंहः अमृताप्रीतम्-महोदयायाः साहित्यिकपरिचयं प्रस्तुवती तस्याः जीवनसम्बद्धान् केचन रोचकान् विशिष्टप्रसङ्गान् च श्रोतृभ्यः अवगतवती। गोष्ठ्याः द्वितीयसत्रे आयोजिते मुक्तमञ्चीयकार्यक्रमे प्राचीमिश्रा अच्युतबाजपेयी च स्वकीयाम् अवधीभाषायां रचितां रचनां प्रस्तुतवन्तौ। प्रशान्तप्रखरेण गजल् प्रस्तुतम्। आलोकशुक्लः, सत्यदेवः अनमोलमिश्रश्च गीतानि प्रस्तुतवन्तः। आर्यनपटेलः ऋषिताप्रजापतिश्च भजनं गीतवन्तौ। गोष्ठ्याः समापनसत्रे सन्दीपअनुरागिणा हास्यव्यङ्ग्यपूर्णानां मुक्तकानां गीतानां च प्रस्तुतिभिः श्रोतृणां मनोरञ्जनं कृतम्। तेन उपस्थितेभ्यः सर्वेभ्यः सदस्येभ्यः आशीर्वचनान्यपि प्रदत्तानि। एवं अमृताप्रीतम्-महोदयायाः स्मृतिभ्यः समर्पिता एषा साहित्यगोष्ठी साहित्यिकविमर्शस्य, सृजनात्मकाभिव्यक्तेः काव्यप्रस्तुतीनां च सुन्दरः समन्वयः अभवत्।



षोडशकलासम्पन्नः श्रीकृष्णसरसासरः

कृष्णपक्षाष्टमीतिथ्यां रात्रौ च बुधवासरे।
कृष्णावतारसञ्जातः कारायां कंसनाशकः ।१।
शुभजन्माष्टमी चेयं वीथिकासु महोत्सवः।
बालकृष्णश्शुभाकारः पश्य दोलयते मुदः ।२।
श्रीकृष्णजन्माष्टमी-दिवसेऽद्य स्मरामि तं वै रमणीयकान्तम्।
नौमि प्रणौमि व्रजसुन्दरञ्च गायामि तस्याचरितं नु रम्यम् ।३।
स्नेहरूपः पृथिव्यां यः स कृष्णस्त्विति प्रोच्यते ।
प्रेमभक्तिरसानन्दः श्रीपतिरिति कथ्यते ।४।
कृष्णोऽस्मान् प्रेमताभूतं शिक्षितवान्नु हृद्गतम् ।
प्रियजनकृते वेला समर्पिता भवेच्छुभम् ।५।
कं कं कं कमलाकान्तं कृष्णं क्वापि कृपाकरम् ।
कृत्स्नकर्मक्रियाकारं कविकर्मणि कामय ।६।
संसारतापहरणप्रवणैकदक्षं भक्ताभयप्रदकरं करुणाप्रवाहम्।
आनन्दसिन्धुसलिलं खलु केलिलोलं
सर्वस्य सारशरणं प्रणमामि कृष्णम्।७।
स्मरामि गायामि वदामि नाम करोमि नित्यं पदवन्दनञ्च।
नमामि नित्यं नलिनाभनेत्रं प्रणौमि तञ्च नयनाभिरामम् ।८।
अशेषराशिश्च सुहासवासी मधुप्रकाशी विषदेशशोषी।
तमोविनाशी च विभाविभासी
स्मितास्यलासी सहसाशुतोषी।९।
गोपालो गोकुलायातो मथुरायास्तु माधवः ।
धरायां नन्दलालोऽयं गोपगोपीजनप्रियः ।१०।
नन्दस्य परमानन्दं गोविन्दं नन्दनन्दनम् ।
अमन्दचन्दनास्यन्दं वन्दे वृन्दावनास्पदम् ।११।
आनन्दकन्दमकरन्दसुच्छन्दस्यन्दं
तन्द्रान्धध्वंसनधुरन्धरपूर्णचन्द्रम्।
नौमीन्दुनिन्दविबुधेन्द्रमुखारविन्दं
मन्दारचन्दनपदं भुवनेन्द्रवन्द्यम् ।१२।
मञ्जुकुञ्जनिकुञ्जे क्व गोविन्दमधुरस्वरः
गोकुलगोपिकासारः प्राणान् प्रीणयते प्रियः ।१३।
सन्ध्यायां मुरलीधारी शौरिर्गोपीरसाशयः ।
व्रजस्तदा किलामग्नो रसे राससमुच्चयः ।१४।
गोविन्दं माधवानन्दं मनोमोहनमन्मथम् ।
वंशीवादनसौन्दर्यं ध्याये त्वां श्रीधरं चिरम् ।१५।
षोडशकलासम्पन्नश्श्रीकृष्णसरसासरः ।
सर्वसत्त्वसमाहारस्सर्वेषां सुखदाकरः ।१६।
नन्दस्य परमानन्दं गोविन्दं नन्दनन्दनम् ।
अमन्दचन्दनास्यन्दं वन्दे वृन्दावनास्पदम् ।।
संसारतापहरणप्रवणैकदक्षं
भक्ताभयप्रदकरं करुणाप्रवाहम् ।
आनन्दसिन्धुसलिलं खलु केलिलोलं
सर्वस्य सारशरणं प्रणमामि कृष्णम्
ॐ सर्वस्य सारशरणं प्रणमामि कृष्णम्
ॐ सर्वस्य सारशरणं प्रणमामि कृष्णम् ।।

रचयिता- आचार्यः
डा.रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

विद्याभ्यासः किमर्थम्?

कुन्तलदेशं पुर्व कृशलसेनः नाम राजा पालयन् आसीत्। कदाचित् तस्य मनसि सन्देहः उत्पन्नः यत् अध्ययनं किमर्थं करणीयम् इति। अतः सः कदाचित् राजसभायां स्वसन्देहम् उपस्थापितवान्। "विद्याभ्यासः कृतः चेत् उच्चः उद्योगः प्राप्यते। ततः प्रभूतं धनं सम्पादयितुं शक्यते' इति उक्तवान् कश्चन पण्डितः।'विद्याभ्यासतः कीर्तिः प्राप्यते' इति उक्तवान् प्रधानमन्त्री।"विद्याभ्यासः कृतः चेत् जनाः आदरं प्रदर्शयन्ति। तेन जीवने तृप्तिः प्राप्यते " इति उक्तवान् कश्चन कविः।"विद्यावान् सर्वत्र पूज्यते। विद्यारूपं धनं केनापि चोरयितुं न शक्यते। अतः विद्याधनं सर्वधनप्रधानम्" इति उक्तवान् कश्चन विद्वान्।किन्तु एतेषु केनापि उत्तरेण राजा न तृप्तः। राज्ञः एषः भावः विदूषकेण लक्षितः। अतः सः उत्थाय उक्तवान्- "प्रभो, समुचितम् उत्तरम् अहं वदामि। किन्तु मम भीतिः यत् मम उत्तरं श्रुत्वा भवान् क्रुद्धः भवेत्" इति।"भीतिः मास्तु। निस्सङ्कोचं वदतु तावत्। अप्रियम् अपि उत्तरं श्रोतुम् अहं सिद्धः एव" इति उक्तवान् राजा। "इदानीं भवतः मनसि यादृशः सन्देहः, तादृशः न उत्पद्येत इति, उत्पन्नः चेदपि सभयान् कश्चित् न पीडयेत् इति एतदर्थं विद्याभ्यासः आवश्यकः ' इति उक्तवान् विदूषकः।विदूषकस्य उत्तरं श्रुत्वा सभासदः सर्वे उच्चैः हसितवन्तः। राजा तु एतस्य उत्तरस्य श्रवणात् क्षणकालं स्तब्धः। किन्त अनन्तरक्षणे खेदं मनस्तः अपनीय विदूषकस्य चातुर्यं स्मरन् अन्यैः सह स्वयम् अपि हसितवान्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

मुद्' (स्त्रीलिङ्गः) शब्दस्य रूपाणि एवं भवन्ति
प्रथमाबहुवचनम् - मुदः
द्वितीयाबहुवचनम् - मुदः
षष्ठीएकवचनम् - मुदः
द्वितीयाबहुवचनानुसारम् अन्वयः (अतिसमीचीनः भावः)
यदा 'मुदः' इति द्वितीयाबहुवचनम् (हर्षाणि / आनन्दान्) स्वीक्रियते, तदा श्लोकस्यान्वयः एवम्-
अन्वयः:इयं च शुभजन्माष्टमी, वीथिकासु महोत्सवः (वर्तते)। (हे सखे!) पश्य, शुभाकारः बालकृष्णः मुदः (आनन्दान्) दोलयते।
अर्थः: इयं शुभा जन्माष्टमी अस्ति, रथ्यासु (वीथिषु) महान् उत्सवः प्रवर्तते। पश्य, सुन्दररूपधारी बालकृष्णः (सर्वेषां मनःसु) आनन्दान् दोलयति (हर्षं वर्धयति)।

व्याकरणचिन्तनम् - ०१

तृच् (कर्त्रर्थे)-प्रत्ययम् उपयुज्य अभ्यासाय सरलानि विंशतिवाक्यानि-
१. अहं मम कार्यस्य कर्ता अस्मि।
२. सूर्यः प्रकाशस्य दाता अस्ति।
३. जननी पुत्रस्य प्रथमा नेत्री भवति।
४. कर्मनिष्ठः सदा जेता भवति।
५. धर्मः एव जगतः धर्ता अस्ति।
६. कृषकः क्षेत्रस्य भर्ता अस्ति।
७. विद्या एव सुखस्य वक्त्री अस्ति।
८. सः समाजस्य कुशलः वक्ता अस्ति।
९. ईश्वरः सर्वेषां विधाता अस्ति।
१०. पिता एव सन्तानस्य त्राता भवति।
११. सत्पुरुषः दुःखस्य हर्ता भवति।
१२. गुरुः अज्ञानस्य हन्ता अस्ति।
१३. नदी जलस्य दात्री अस्ति।
१४. धीरः पुरुषः संकटकालस्य योद्धा अस्ति।
१५. सः ग्रन्थस्य रचयिता अस्ति।
१६. साधुः मोक्षमार्गस्य गन्ता भवति।
१७. मित्रं मम प्रेरणायाः दातृ अस्ति?
१८. जीवः एव स्वकर्मणः भोक्ता भवति।
१९. विद्या एव विनयस्य प्रदात्री अस्ति।
२०. त्वमेव तव भविष्यस्य निर्माता असि।

अभ्याससूत्रम्-
तृच्-पुं = ता, स्त्री = त्री, नपुं = तृ
दाता / दात्री / दातृ, कर्ता / कर्त्री / कर्तृ, नेता / नेत्री / नेतृ -- इत्यादीनि उदाहरणानि इति।

गयातीर्थे पिण्डदानस्य महत्त्वं पौराणिकप्रकरणं च

पिंडदानं सनातनहिन्दूधर्मस्य एकः परमपवित्रः महत्वपूर्णश्च पितृयज्ञः अस्ति, यः मृतपूर्वजानां आत्मनः शान्तये मोक्षप्राप्तये च क्रियते।

गरुड़पुराणे वर्णितम् यत्-

"अन्नदानं परं दानं विद्यादानं ततः परम्।
पितृऋणविमोचनं च पिंडदानं विशिष्यते॥"

गयाक्षेत्रस्य परिचयः इतिहासश्च

गयाक्षेत्रं वर्तमानकाले बिहारराज्ये फल्गुनद्याः तटे अवस्थितं वर्तते। ऐतिहासिकदृष्ट्या पौराणिकदृष्ट्या च इयं नगरी अतिप्राचीना अस्ति। सनातनपरम्परायां गया 'पितृतीर्थं' इति नाम्ना विख्याता। न केवलं हिन्दूधर्मे, अपितु बौद्धधर्मे (बोधगया) अपि अस्य क्षेत्रस्य इतिहासः अतिसमृद्धः वर्तते। मौर्यकाले, गुप्तकाले, तदनन्तरं च अस्य तीर्थस्य निरन्तरं विकासः अभवत्। वर्तमानकालस्य विष्णुपदमन्दिरस्य जीर्णोद्धारः अष्टादशशताब्द्यां (१७८७ ख्रीष्टाब्दे) इन्दौरनगरस्य महारानी-अहिल्याबाई- होल्कर- महोदयया कारितः, यः स्थापत्यकलायाः अनुपमः आदर्शः अस्ति।

पौराणिकप्रकरणम् (गयासुरकथा)

वायुपुराणानुसारं गयासुरनामकः एकः महान् असुरः आसीत्। सः तीव्रं तपः कृत्वा ब्रह्मणः वरं प्राप्नोत् यत् तस्य शरीरं दर्शनेन स्पर्शनेन च सर्वपापमुक्तं स्वर्गप्रदं च भवेत्। तस्य प्रभावेण यमालयः शून्यः अभवत्। तदा देवाः यज्ञाय गयासुरस्य पवित्रं शरीरं याचितवन्तः। गयासुरः पृथिव्यां शयनं कृतवान्, तस्य उपरि देवाः यज्ञं कृतवन्तः। तस्य निश्चलत्वाय भगवान् विष्णुः स्वयं गदाधररूपेण तस्य शिरसि स्थितवान्। गयासुरस्य भक्तेः प्रसन्नः भूत्वा विष्णुः वरं दत्तवान् यत्- "अद्य आरभ्य इदं स्थानं 'गयाक्षेत्रं' इति नाम्ना प्रसिद्धं भविष्यति, अत्र यः पिण्डदानं करिष्यति, तस्य पितरः नरकात् मुक्ताः भूत्वा मोक्षं प्राप्स्यन्ति।"

विभिन्नपुराणेषु उल्लिखिताः श्लोकाः

गरुड़पुराणस्य ब्रह्मखण्डे वर्णितः यत्-

"तत्र पिण्डप्रदानेन पितॄणां परमा गतिः।
गयागमनमात्रेण पितृणामनृणो भवेत्॥"

अर्थः- गयाक्षेत्रे पिण्डदानेन पूर्वजानां नितरां मोक्षः भवति। केवलं श्रद्धापूर्वकं गयातीर्थस्य दर्शनार्थं गमनेन एव मनुष्यः स्वकीय-पितृऋणात् मुक्तः (अनृणो) भवति।)

✨ *वायुपुराणे गयामाहात्म्ये कथितम्-*

"गयाशीर्षे यदा पिण्डं दद्यादन्नमथापि वा।
कुलकोटिमुद्धरेत् प्राज्ञः किं पुनश्चात्मजं पदम्॥"

अर्थः गयाशीर्षे यः प्राज्ञः पुरुषः पिण्डं अन्नं वा ददाति, सः स्वकीयकुलस्य कोटिपुरुषाणाम् उद्धारं करोति, स्वस्य मुक्तिं च प्राप्नोति। ✨ अग्निपुराणे पिण्डदानस्य फलं वर्णितम्-

"आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यतु मया दिया।
गयाशीर्षे पिण्डदानात् पितॄणां स्यात् सनातनी॥"

अर्थः गयाक्षेत्रे पिण्डदानेन आब्रह्मस्तम्बपर्यन्तं सम्पूर्णं जगत् तृप्तं भवति, पितरश्च सनातनीं (शाश्वतीं) गतिं प्राप्नुवन्ति। ✨ महाभारते वनपर्वणि (तीर्थयात्रापर्वणि) उक्तम्-

"गयां गत्वा तु यः श्राद्धं कुरुते नियतेन्द्रियः।
कुलमुद्धरते वीरः स्वर्गलोकं च गच्छति॥"



विष्णुपदमन्दिरस्य विशिष्टं माहात्म्यम्-

गयाक्षेत्रस्य मुख्यकेन्द्रं विष्णुपदमन्दिरं वर्तते। पौराणिकमान्यतानुसारं यदा भगवान् विष्णुः गयासुरं निश्चलं कर्तुं तस्य शिरसि पादप्रहारं कृतवान्, तदा शिलायां भगवतः चरणचिह्नं अङ्कितम् अभवत्। इदमेव 'विष्णुपदम्' इति नाम्ना पूज्यते।

• विष्णुपददर्शनस्य फलम्: विष्णुपदतीर्थे पितॄणां नाम्ना पिण्डार्पणेन तेषां साक्षात् विष्णुलोके (वैकुण्ठे) वासः भवति।

• धार्मिकमहत्त्वम्- एतन्मन्दिरं कसौटी-प्रस्तरेण (धूसर- बेसाल्ट- पाषाणेन) निर्मितम् अस्ति। मन्दिरस्य गर्भगृहे भगवतः विष्णोः चत्वारिंशत् सेन्टीमीटरं दीर्घं दक्षिणपादचिह्नं अस्ति, यत्र शङ्ख- चक्र- गदा- पद्मादीनां चिह्नानि दृश्यन्ते। अत्र पिण्डदानेन कोटिकुलमुद्धरति।

गयाक्षेत्रे पिण्डदानस्य प्रमुखाणि स्थानानि-

वायुपुराणानुसारं गयायां त्रिचत्वारिंशत् वेदिकाः सन्ति, परन्तु तासु कानिचित् स्थानानि अतीव प्रमुखाणि अनिवायाणि च मन्यन्ते:

• फल्गु नदी (फल्गुतीर्थम्)- पिण्डदानस्य आरम्भः फल्गुनद्याः तटात् भवति। पौराणिककथानुसारं इयं नदी भगवतः विष्णूः द्रवरूपा अस्ति। सीतायाः शापेन इयं नदी अन्तसलिला (अन्तर्वाहिनी) अभवत्, अतः अत्र वालुकाभिः (रेणुभिः) अपि पिण्डदानं क्रियते।

•अक्षयवटः- गयाश्राद्धस्य अन्तिमं पिण्डदानं अक्षयवटच्छायायां भवति। अत्र कृतं पिण्डदानं तर्पणं च 'अक्षयं' भवति। तदनन्तरं वंशजः पितृऋणात् पूर्णतः मुक्तः भवति।

•गयाशीर्षम् (प्रेतशिला)- येषां पितृणां अकालमृत्युः (दुर्घटना, आत्महत्या इत्यादिभिः) अभवत्, ये च प्रेतयोनौ कष्टं प्राप्नुवन्ति, तेषां मुक्तेः कृते प्रेतशिलायां पिण्डदानं परमं फलदायि मन्यते।

•रामशिला- अस्मिन् पर्वते भगवता श्रीरामेण अपि पितृदेवतानां कृते पिण्डदानं कृतम् आसीत्। अत्र पिण्डदानेन सर्वविधेभ्यः पापेभ्यः मुक्तिः भवति।

गयायां पिण्डदानस्य महत्ता

गयायां पिण्डदानस्य विशेषमाहात्म्यं वर्तते। अत्र श्राद्धकर्मणि फल्गुनद्याः स्नानं, विष्णुपदमन्दिरस्य दर्शनं, अक्षयवटच्छायायां पिण्डदानं च प्रमुखानि स्तम्भाः सन्ति।

•नरकान्मुक्तिः- गयाक्षेत्रे पिण्डदानेन पितरः 'पुं' नाम्नो नरकात् मुक्ताः भवन्ति।

• अक्षयफलम्- अक्षयवटस्य समीपे दत्ताः पिण्डाः अक्षयाः भवन्ति।

• शत्रु-ऋणान्मुक्तिः- पितृऋणस्य अपाकरणाय गयाश्राद्धं सर्वश्रेष्ठं साधनं मन्यते।

संक्षेपतः वक्तुं शक्यते यत् गयाक्षेत्रं केवलं भौगोलिकं स्थानं नास्ति, अपि तु श्रद्धायाः, पितृभक्तेः, आध्यात्मिकमुक्तेश्च परमं केन्द्रं वर्तते। विष्णुपदमन्दिरं तस्य श्रद्धायाः मुख्यस्तम्भः अस्ति। अतः एव सनातनधर्मे प्रत्येकं जनः जीवने एकदा अवश्यमेव गयायात्रां कृत्वा विष्णुपदे पितॄणां तर्पणं पिण्डदानं च कर्तुम् इच्छति।

अन्तिमः किन्तु न न्यूनः-

जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात्।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता॥


लेखकः- डॉ. यशोदानंद मिश्रः
भूतपूर्व प्राचार्यः, सह व्याख्याता, व्याकरणविभागः
श्री रामप्रकाश- संस्कृतमहाविद्यालयः,
पातेपुरम्, वैशाली, बिहार

विक्रमजीतसिंहसनातनधर्ममहाविद्यालये दशदिवसीय-संस्कृतसम्भाषणशिबिरस्य भव्यः समापनसमारोहः सम्पन्नः

विज्ञानप्रदर्शनी, संस्कृतनाटिका, संस्कृतक्रिकेट्-विवरणम् च अभवन् प्रमुखाकर्षणानि; ५३ विद्यार्थिनः शिबिरे पञ्जीकृताः।

कानपुरम्। विक्रमजीतसिंहसनातनधर्ममहाविद्यालये संस्कारशालायाः संस्कृतविभागस्य तथा संस्कृतभारत्याः कानपुरमहानगरस्य संयुक्तत्त्वावधाने आयोजितस्य दशदिवसीयस्य संस्कृतसम्भाषणशिबिरस्य समापनसमारोहः अत्यन्तम् उत्साहेन हर्षोल्लासेन च सम्पन्नः। अस्मिन् शिबिरे कुलम् ५३ विद्यार्थिनः पञ्जीकरणं कृत्वा सक्रियतया सहभागिताम् अकुर्वन्। समारोहे मुख्यातिथिरूपेण श्रीचन्द्रप्रकाशत्रिपाठीमहोदयस्य गरिमामयी उपस्थितिः आसीत्। तदतिरिक्तं प्रो. इन्द्रमणिः, प्रो. अनिलकुमारमिश्रः, प्रो. आनन्दशुक्लः, श्रीमती मञ्जुद्विवेदी, प्रो. आशीषसिंहः, प्रो. नन्दलालः तथा डॉ. धीमान् इत्यादयः विशिष्टाः अतिथयः उपस्थिताः आसन्। अतिथिभिः संस्कृतभाषायाः प्रचारप्रसारे विद्यार्थिनां भूमिकायाः महत्त्वं प्रतिपादितम् तथा छात्राणां प्रयासाः प्रशंसिताः। शिबिरस्य संयोजिका प्रो. शोभामिश्रा तथा संस्कारशालायाः सहसंयोजकः प्रो. ओमप्रकाशमिश्रः कार्यक्रमस्य सफलतायै महत्त्वपूर्णं योगदानम् अददताम्। संस्कृतसम्भाषणप्रशिक्षकः देवेशविद्यार्थी विद्यार्थिभ्यः दशदिनपर्यन्तं संस्कृतभाषायां सम्भाषणस्य, विचाराणाम् अभिव्यक्तेः तथा विविधगतिविधिषु संस्कृतस्य प्रयोगस्य प्रशिक्षणम् अददात्। कार्यक्रमस्य कुशलं सञ्चालनं शोधच्छात्रा सुश्री देवांशिकाद्विवेदी कृतवती। सम्पूर्णस्य समापनसमारोहस्य विशेषप्रबन्धनं श्रीसुरेन्द्रत्रिवेदीमहोदयेन कृतम्। समारोहे महाविद्यालयस्य प्राध्यापकाः, शोधच्छात्राः तथा विद्यार्थिनः उत्साहपूर्वकं समुपस्थिताः आसन्।

दीपावल्याः धार्मिकं ज्योतिषीयं च महत्त्वं प्रतिपादितम्—आचार्यः विशालपाण्डेयः



संस्कृतसंस्कृतिविकाससंस्थानस्य दीपोत्सवमासमहोत्सवे

डॉ. सीमापोखरियालेन अग्नितत्त्वस्य सकारात्मकशक्तेः स्वास्थ्यपरम्पराणां च महत्त्वं विवेचितम्

हिमसंस्कृतवार्ताः। सत्येन्द्रपाठकः, लखनऊ।

संस्कृतसंस्कृतिविकाससंस्थानस्य उत्तरप्रदेश-न्यासस्य तत्त्वावधाने दीपोत्सवमासमहोत्सव-२०२६ इत्यस्य उपलक्ष्ये २०२६ तमस्य वर्षस्य नवम्बर्-मासस्य ३ दिनाङ्के मङ्गलवासरे सायं ७:३० वादने गूगलमीट्-माध्यमेन 'दीपावल्याः धार्मिकं ज्योतिषीयं च महत्त्वम्' इति विषये विशिष्टं व्याख्यानम् आयोजितम्। कार्यक्रमे विद्वद्भिः दीपावल्याः धार्मिकस्वरूपस्य, आध्यात्मिकमान्यतानां, ज्योतिषीयमहत्त्वस्य तथा स्वास्थ्यसम्बद्धपरम्पराणां च विषये स्वविचाराः प्रस्तुताः।कार्यक्रमस्य शुभारम्भः सुश्रीनन्दिन्याः मङ्गलाचरणेन अभवत्। तत्पश्चात् सुश्रीशिवामिश्रया संस्थानस्य कुलगीतं प्रस्तुतम्। संस्थानस्य संयोजिका डॉ. सुमनमिश्रा स्वागतभाषणं प्रस्तुतवती तथा अतिथीनां प्रतिभागिनां च अभिनन्दनं कृतवती।

कार्यक्रमे मुख्यातिथिरूपेण उत्तराखण्डस्य देहरादूननगरस्य ज्योतिषाचार्या तथा प्राणिक्-चिकित्सिका डॉ. सीमापोखरियाल् उपस्थितवती। तया अग्निसूक्तस्य मन्त्रेण स्ववक्तव्यस्य प्रारम्भं कुर्वती पञ्चमहाभूतेषु अग्नितत्त्वस्य प्रमुखतां प्रतिपादितम्। तया अमावस्यायाः रात्रेः विशेषतां वर्णयन्त्या उक्तं यत् अस्यां तिथौ सूर्यास्तानन्तरं चन्द्रमसोऽपि अस्तः भवति। अतः अस्यां रात्रौ नकारात्मकशक्तयः सक्रियाः भवन्तीति धार्मिकमान्यता अस्ति। एतासां निवारणाय रात्रौ सर्षपतैलेन दीपप्रज्वालनस्य परम्परा प्रचलिता अस्ति। दीपप्रज्वालनेन वातावरणे सकारात्मकायाः ऊर्जायाः सञ्चारः भवति इति तया प्रतिपादितम्। धनधान्यसमृद्धेः स्वास्थ्येन सह सम्बन्धं स्थापयित्वा दीपावल्याः परम्पराणां महत्त्वमपि तया विशदीकृतम्।मुख्यवक्तृरूपेण वाराणसीस्थायाः संस्कृतिसरोवरसेवासमित्याः अध्यक्षः आचार्यः विशालपाण्डेयः दीपावल्याः धार्मिकं ज्योतिषीयं च महत्त्वं विशदतया प्रतिपादितवान्। तेन दीपावल्याः विविधाः धार्मिकपरम्पराः, स्वास्थ्यसम्बद्धाः मान्यताः तथा आयुर्वेदस्य औषधीयपरम्पराणां च सन्दर्भे विचाराः प्रस्तुताः। धनत्रयोदश्याः अवसरे औषधीयवृक्षाणां रोपणस्य परम्परायाः महत्त्वमपि तेन उल्लिखितम्। अपि च यमदीपप्रज्वालनस्य विधिं तस्य धार्मिकमहत्त्वं च विवृण्वता तेन उक्तं यत् यमदीपदानस्य परम्परा अकालमृत्योः निवारणकामनया सम्बद्धा अस्ति।कार्यक्रमस्य कुशलं सञ्चालनं सत्येन्द्रपाठकः 'शास्त्री' अकरोत्। अन्ते श्रीमान् मयङ्कतिवारी धन्यवादज्ञापनम् अकरोत् तथा विकासशुक्लः शान्तिपाठं प्रस्तुतवान्।कार्यक्रमस्य आयोजनाध्यक्षा डॉ. गीतादुबे, संयोजिका डॉ. सुमनमिश्रा, समन्वयिका डॉ. मीनाक्षीआर्या, आयोजनस्य उपाध्यक्षः श्रीमान् मयङ्कतिवारी तथा आयोजनसचिवः सत्येन्द्रपाठकः 'शास्त्री' आसन्।संस्थानेन आयोजितम् एतद् व्याख्यानं दीपावल्याः धार्मिकस्य ज्योतिषीयस्य च महत्त्वस्य जनसामान्ये प्रसारणाय तथा भारतीयसांस्कृतिक-आध्यात्मिकपरम्पराणां प्रति जागरूकतायाः विकासाय महत्त्वपूर्णः प्रयासः आसीत्।

छत्तीसगढस्य स्थापनादिवसे त्रिदिवसीयः राज्योत्सवः






हिमसंस्कृतवार्ताः-वत्सदेशराजशर्मा, रायपुरम्।

छत्तीसगढ राज्यस्य स्थापना भारतस्य पूर्व प्रधानमन्त्रिणा स्वर्गीयेन अटल बिहारी वाजपेयी महोदयेन कृता। इदं राज्यं १ नवम्बर २००० दिनाङ्के स्थापितम्। अतः १ नवम्बर दिनाङ्कः छत्तीसगढवासिभ्यः गौरवस्य दिवसः अस्ति। तदा आरभ्य अद्य पर्यन्तं षड्विंशतिः वर्षाणि अभवन्। प्रतिवर्षं नवम्बरमासे प्रदेशे राज्योत्सवः भवति। अस्मिन् वर्षे मुख्य कार्यक्रमः राजधान्यां नवा रायपुरे १ नवम्बरतः ३ नवम्बर पर्यन्तं त्रिदिनं भवति।कार्यक्रमस्य उद्घाटनं केन्द्रीयमन्त्रिणः मनसुख माण्डविया महोदयस्य मुख्यातिथित्वे अभवत्। माननीयेन मुख्यमन्त्रिणा विष्णुदेवसाव महोदयेन दीपं प्रज्वाल्य उद्घाटनं कृतम्। संस्कृतिमन्त्री राजेश अग्रवालः स्वागत भाषणं कृतवान्।

मुख्यमन्त्रीमहोदयः अध्यक्षीय भाषणे उक्तवान् यत् गतेषु त्रिषु वर्षेषु नक्सलवादिनां गतिविधयः प्रभावीरूपेण समाप्ताः। अस्मिन् विषये छत्तीसगढः अग्रे गतवान् सफलः च अभवत्। अस्माकं राज्यं धान्यस्य पात्रम् इति प्रसिद्धम्। अत्र कृषकेभ्यः धान्यस्य अधिकतमं मूल्यं दीयते।मुख्यातिथिः महोदयः छत्तीसगढस्य प्रगतिं विशेषतः उल्लिखितवान्। अधुना इदं राज्यं पर्यटनदृष्ट्या विशेषं स्थानं प्राप्तम्। मुख्यमन्त्रिणः नेतृत्वे अटल बिहारी वाजपेयी महोदयस्य स्वप्नं साकारं भवति। राज्य स्थापनायाः समये छत्तीसगढे निर्धनता, असौकर्यं साधनानाम् अभावः च आसीत्। अधुना केन्द्रसर्वकारः राज्यसर्वकारः च मिलित्वा प्रदेशस्य विकासं वर्धयतः। राज्यस्तरीये राज्योत्सवे विभिन्नाः विभागाः स्वश्रेष्ठकार्याणां प्रदर्शनीं स्थापयन्ति। संस्कृतभारती महानगर रायपुरस्य अध्यक्षः डॉ. लूनेशकुमारवर्मामहोदयः अवदत् यत् संस्कृत विद्या मण्डलस्य अध्यक्षस्य राजेशराजपूत महोदयस्य प्रयासेन संस्कृतस्य प्रसाराय अत्र प्रदर्शनी अस्ति। जनगणनायां भाषाविषयकसूचनायां संस्कृतं लेखनीयम् इति सूचना अपि दीयते। छत्तीसगढराज्यस्य निर्माणात् पश्चात् लोक महोत्सवैः स्थानीय साहित्यकाराणां, लोक कलाकाराणां परम्पराणां च नवा दिशा प्राप्ता। राज्य स्थापना दिवसे षट्त्रिंशत् विविध क्षेत्रेषु ये उल्लेखनीयं कार्यं कुर्वन्ति, ते राज्य अलङ्करणेन सम्मानिताः भवन्ति।

समसामयिकी

१. प्रश्नः २०२६ तमे वर्षे फीफा (FIFA) विश्वचषक-पादकन्दुक-स्पर्धायाः संयुक्त-आयोजनं के देशाः कुर्वन्ति?

उत्तरम्: अस्याः स्पर्धायाः संयुक्त-आयोजनम् अमेरिका, कनाडा, मेक्सिको च एते त्रयः देशाः कुर्वन्ति।

२. प्रश्नः २०२६ तमे वर्षे विंशतितम-एशियाई-क्रीडास्पर्धायाः (20th Asian Games) आयोजनं कुत्र निर्धार्यते?

उत्तरम्: अस्याः आयोजनं जापान-देशस्य आइची-नागोया (Aichi-Nagoya) प्रान्तयोः निर्धार्यते।

३. प्रश्नः भारतस्य गगनयान-अभियानस्य मानवसहित-अन्तरिक्ष-उड्डयनस्य लक्ष्यं कस्मिन् वर्षे निर्धारितम् अस्ति?

उत्तरम्: अस्य लक्ष्यं २०२६ तमे वर्षे निर्धारितम् अस्ति।

४. प्रश्नः वर्ष २०२६ मध्ये संयुक्तराष्ट्रसंघेन (UN) कः अन्तर्राष्ट्रिय-वर्षः इति उद्घोषितः?

उत्तरम्: संयुक्तराष्ट्रसंघेन वर्ष २०२६ 'अन्तर्राष्ट्रिय-ऋषि-तृण-चारण-वर्षः' (International Year of Rangelands and Pastoralists) इति उद्घोषितः।

५. प्रश्नः २०२६ तमे वर्षे पञ्चविंशतितम-शीतकालीन-ओलम्पिक-क्रीडास्पर्धायाः (Winter Olympics) आयोजनं कस्मिन् देशे अभवत्?

उत्तरम्: अस्याः आयोजनम् इटली-देशस्य मिलान-कोर्टिना (Milano-Cortina) नगरयोः अभवत्।